# नराभरणम्

Exported from ambuda.org on 2025-12-23 05:04:05 UTC

1

स्वहस्ते नाचरेद्दानं परहस्तेन मर्दनम् ।भार्या हस्तेन ताम्बूलं मातृहस्तेन भोजनम् ॥ १ ॥

2

नरस्याभरणं रूपं रूपस्याभरणं गुणः ।गुणस्याभरणं ज्ञानं ज्ञानस्याभरणं क्षमा ॥ २ ॥

3

न्यायो राजविभूषणं वितरणं पाणिद्वयोर्भूषणंलज्जा स्त्रीजनभूषणं सरसता सख्युस्सदा भूषणम् ।विद्या विप्रविभूषणं हरिकथा श्रोत्रद्वयोर्भूषणंसत्पुत्रः कुलभूषणं सुकविता वाचस्सदा भूषणम् ॥ ३ ॥

4

नभोभूषा पूषा कमलवनभूषा मधुकरोवचोभूषा सत्यं वरयुवतिभूषा सुगुणता ।मनोभूषा मैत्री मधुसमयभूषा मधुभृतःसतां भूषा शान्तिः सकलजनभूषा वितरणम् ॥ ४ ॥

5

असम्पन्नः कथं बन्धुरसहिष्णुः कथं प्रभुः ।अनात्मवित्कथं विद्वान् असन्तुष्टः कथं सुखी ॥ ५ ॥

6

शाठ्येन मित्रं कलुषेण धर्मं परावमानेन समृद्धिभावम् ।सुखेन विद्यां परुषेण नारीं वाञ्छन्ति ये नूनमपण्डितास्ते ॥ ६ ॥

7

दरिद्रस्य द्विभार्यत्वं पथि क्षेत्रं द्विधा कृषिः ।प्रातिभाव्यं च साक्षित्वं पञ्चानर्थास्स्वयंकृताः ॥ ७ ॥

8

यस्य माता गृहे नास्ति भार्या चाप्रियभाषिणी ।अरण्यं तेन गन्तव्यं यथारण्यं तथा गृहम् ॥ ८॥

9

सन्देहं स्वल्पमाश्रित्य साधवो यान्ति दूष्यताम् ।रात्रौ वल्मीकसम्पर्कात् रज्जुस्सर्पायते खलु ॥ ९ ॥

10

हतं वित्तमदानेन हता नारी निरङ्कुशा ।ब्रह्मस्वेन हतो राजाऽनग्निना ब्राह्मणो हतः ॥ १० ॥

11

आलस्येन हता विद्या आलापेन कुलाङ्गना ।अल्पबीज हतं क्षेत्रं हतं सैन्यमनायकम् ॥ ११ ॥

12

तत्त्वज्ञस्य तृणं शास्त्रं वीरस्य रमणी तृणम् ।विरक्तस्य तृणं नारी निःस्पृहस्य नृपास्तृणम् ॥ १२ ॥

13

किं पौरुषैस्त्यक्तपरोपकारैःसौभाग्यहीनैरपि किं सुरूपैः ।किं वा धनैस्सद्विनियोगशून्यैःवाग्भिश्च किं विष्णुकथाविरक्तैः (क्तौ?) ॥ १३ ॥

14

अर्थेन किं कृपणहस्तगतेन तेनरूपेण किं गुणपराक्रमवर्जितेन ।ज्ञानेन किं बहुजनैः कृतमत्सरेणमित्रेण किं व्यसनकालपराङ्मुखेन ॥ १४ ॥

15

सूर्योदयस्फुरणहानि तमिस्रजालं सुस्निग्धबन्धुजनदर्शनहानि दुःखम् ।नारीकटाक्षपतनावधि पुंसि धैर्यं नारायणस्मरणपर्यवसायि पापम् ॥ १५ ॥

16

यस्तु पर्यटते देशान् यस्तु सेवेत पण्डितान् ।तस्य विस्तारिता बुद्धिः तैलबिन्दुरिवाम्भसि ॥ १६ ॥

17

स्नानमूलमिदं कर्म कृषिमूलमिदं धनम् ।आज्ञामूलमिदं राज्यं पत्नीमूलमिदं गृहम् ॥ १७ ॥

18

यत्र विद्यागमो नास्ति यत्र नास्ति धनागमः ।यत्र देहसुखं नास्ति न तत्र निमिषं वसेत् ॥ १८ ॥

19

लक्ष्मीश्चेन्न सरस्वती तदुभयं यद्यस्ति नोदारतातत्रापि त्रितयं घटेत कतिचित्पुण्यैरगण्यैरपि ।सौजन्यं न विजृम्भते तदपि चेन्नास्त्येव धर्मे मतिःतत्सर्वं जगदीश्वरस्य कृपया त्वय्येव सन्दृश्यते ॥ १९ ॥

20

सरस्वती स्थिता वक्त्रे लक्ष्मीर्वक्षसि ते स्थिता ।कीर्तिः किं कुपिता राजन्! येन देशान्तरं गता ॥ २० ॥

21

श्रुत्वा च दूरे भवदीयकीर्तिं कर्णौ च तुष्टौ न तु चक्षुषी मे ।तयोर्विवादं परिहर्तुकामः समागतोऽहं भवदीक्षणाय ॥ २१ ॥

22

यो न ददाति न भुङ्क्ते विभवे सति तस्य तद्द्रव्यम् ।तृणकृतकृत्रिमपुरुषो [ऽयं] रक्षति सस्यमिव परस्यार्थे ॥ २२ ॥

23

चकोरा इव शीतांशुं चातका इव तोयदम् ।चञ्चरीका इवाम्भोजं द्रष्टुं त्वामुत्सुका वयम् ॥ २३ ॥

24

को वा जन्मान्तरे पूर्वं धर्मस्सम्पादितो मया ।यत्सतां दर्शनं प्राप्तं सर्वस्फीतफलप्रदम् ॥ २४ ॥

25

इयमेव हि सत्त्वशालिनां महतां कापि कठोरचित्तता ।उपकृत्य भवन्ति दूरतः परतः प्रत्युपकारशङ्कया ॥ २५ ॥

26

उदये सविता ताम्रः ताम्र एवास्तमेति च ।सम्पद्विपदवस्थासु महतामेकरूपता ॥ २६ ॥

27

किं वात्र चित्रं यत्सन्तः परानुग्रहतत्पराः ।न हि स्वदेहशैत्याय जायते चन्दनद्रुमः ॥ २७ ॥

28

साधोः परुषवाक्येन मनो नो याति विक्रियाम् ।न हि तापयितुं शक्यः सागराम्भस्तृणोल्कया ॥ २८ ॥

29

प्रसादो यस्य वदने कृपा यस्यावलोकने ।वचने यस्य माधुर्यं स साक्षात्पुरुषोत्तमः ॥ २९ ॥

30

कुपितोऽपि गुणायैव गुणवान्भवति ध्रुवम् ।स्वभावमधुरं क्षीरं मथितं हि रसोत्तरम् ॥ ३० ॥

31

गुणाः कुर्वन्ति दूतत्वं सदुक्त्या सारवेदिनः ।केतकीगन्धमाघ्राय स्वयमायान्ति षट्पदाः ॥ ३१ ॥

32

सन्त एव सतां नित्यमापत्तरण हेतवः ।गजानां पङ्कलग्नानां गजा एव धुरन्धराः ॥ ३२ ॥

33

कराद्गलितखाद्यस्य का हानिः करिणो भवेत् ।पिपीलिका तु तेनैव बिभर्ति स्वकुटुम्बकम् ॥ ३३ ॥

34

सत्सु कार्यवतां पुंसामलमेवाग्रतस्स्थितिः ।वाग्वृत्तिरधिका सा चेत्करोत्युभयलाघवम् ॥ ३४ ॥

35

प्रसादो निष्फलो यस्य कोपश्चास्ति निरर्थकः ।न तं भर्तारमिच्छन्ति षण्डं पतिमिव स्त्रियः ॥ ३५ ॥

36

सविधे निवसेन्मुहुर्बुधानां मतिमन्दोऽपि भवेदगाधसत्त्वः ।मलयाचलकल्पिताधिवासः पिचुमन्दोऽपि पटीरतां प्रयाति ॥ ३६ ॥

37

महान्त एव तुष्यन्ति सदुक्त्या सारवेदिनः ।स्वल्पाः कूपाः प्रवर्धन्ते ज्योत्स्नया किं समुद्रवत् ॥ ३७ ॥

38

अपि सर्वविदो न शोभते वचनं श्रोतरि बोधवर्जिते ।परिणेतरि नष्टलोचने सफलः किन्नु कलत्रविभ्रमः ॥ ३८ ॥

39

अव्युत्पन्ने श्रोतरि वक्तृत्वमनर्थकं पुंसाम् ।नेत्रविहीने भर्तरि लावण्यमनर्थकं स्त्रीणाम् ॥ ३९ ॥

40

यो यत्र सततं भुङ्क्ते यत्र याति निरन्तरम् ।स तत्र लघुतामेति बृहस्पतिसमो बुधः ॥ ४० ॥

41

नाभ्युत्थानक्रिया यत्र नालापो मधुराक्षरम् ।गुणदोषकथा नैव स स्वर्गोऽपि न गम्यताम् ॥ ४१ ॥

42

अहो दुर्जनसर्पस्य सर्पस्य महदन्तरम् ।कर्णमन्यस्य दशति अन्यः प्राणैः वियुज्यते ॥ ४२ ॥

43

करोति स्वमुखेनैव बहुधान्यस्य खण्डनम् ।नमः पतनशीलाय खलाय मुसलाय च ॥ ४३ ॥

44

उच्चासनगतो नीचः नीच एव न चोत्तमः ।प्रासादशिखरस्थोऽपि काकः किं गरुडायते ॥ ४४ ॥

45

उत्तमैस्स्वीकृतो नीचः नीच एव न चोत्तमः ।भैरवाधिष्ठितश्श्वा तु कदाचिन्न तु केसरी ॥ ४५ ॥

46

असतां धर्मबुद्धिश्चेत् सतां सन्तापकारणम् ।उपोषितस्य व्याघ्रस्य पारणं पशुमारणम् ॥ ४६॥

47

यथा गजाः परिश्रान्ताः तरुच्छायां समाश्रिताः ।विश्राम्य तद्द्रुमं घ्नन्ति तथा नीचसमागमः ॥ ४७ ॥

48

लघुना सह संवासो लाघवस्यैव कारणम् ।शुष्कालाबोश्च संसर्गात् लोहमुत्प्लवतेऽम्भसि ॥ ४८ ॥

49

अहमिहैव वसन्नपि तावकः त्वमपि तत्र वसन्नपि मामकः ।न तनुसङ्गम एव (सु)सङ्गमः हृदयसङ्गम एव (सु)सङ्गमः ॥ ४९ ॥

50

दूरस्थोऽपि न दूरस्थो यो यस्य हृदये वसेत् ।यो यस्य हृदये नास्ति समीपस्थोऽपि दूरतः ॥ ५० ॥

51

मातेव रक्षति पितेव हिते नियुङ्क्तेकान्तेव चाभिरमयत्यपनीय खेदम् ।कीर्तिं च दिक्षु विमलां वितनोति लक्ष्मींकिं किं न साधयति कल्पलतेव विद्या ॥ ५१ ॥

52

संभ्रमस्नेहमाख्याति वपुराख्याति भोजनम् ।आचारः कुलमाख्याति देशमाख्याति भाषणम् ॥ ५२ ॥

53

विद्याहीनस्य विप्रस्य विडम्बाय गुणान्तरम् ।परिधानविहीनस्य परिकर्मान्तरं तथा ॥ ५३ ॥

54

सदा वक्रस्सदा क्रूरः सदा पूजामपेक्षते ।कन्याराशिगतो नित्यं जामाता दशमो ग्रहः ॥ ५४ ॥

55

अल्पाश्रयं समासाद्य महानप्यल्पको भवेत् ।गजेन्द्रः पर्वताकारो यथा दर्पणमाश्रितः ॥ ५५ ॥

56

असहायस्समर्थोऽपि तेजस्वी किं करिष्यति ।रामस्सुग्रीवसाहाय्यात् लङ्कां निर्दग्धवान्पुरा ॥ ५६ ॥

57

अस्त्यद्यापि चतुस्समुद्रपरिखापर्यन्तमुर्वीतलंसन्त्यन्येऽपि विदग्धकेलिरसिकाः केचित्क्वचिद्भूभुजः।एकस्तत्र निरादरो यदि भवेत् अन्यो भवेत्सादरःवाग्देवी वदनाम्बुजे यदि भवेत् को नाम दीनो जनः ॥ ५७ ॥

58

पात्रमपात्रीकुरुते दहति गुणं स्नेहमाशु नाशयति ।अमले मलं नियच्छति दीपज्वालेव खलजने मैत्री ॥ ५८ ॥

59

चिन्तासमं नास्ति शरीरशोषणं क्षुधासमं नास्ति शरीरपीडनम् ।मातुस्समं नास्ति शरीरपोषणं विद्यासमं नास्ति शरीरभूषणम् ॥ ५९ ॥

60

वितरति फणिलोकं विद्रुतानां नृपाणा-ममरभुवनलक्ष्मीमाहवे सम्मुखानाम् ।अपि च पदनतानामाधिपत्यं जगत्यांकिमिह वितरणं ते कीर्तयामि क्षितीन्द्र ॥ ६० ॥

61

महतामवलोकनं परं क्षणमात्रेण फलं प्रदास्यति ।नहुषो विजहौ भुजङ्गतां यदुसूनोरवलोकनेन यत् ॥ ६१ ॥

62

अन्यत्र भीष्मानाङ्गेयात् अन्यत्र च हनूमतः ।.हरिणीखुरमात्रेण चर्मणा मोहितं जगत् ॥ ६२ ॥

63

उत्कृष्टमध्यमनिकृष्टजनेषु मैत्री यद्वच्छिलासु सिकतासु जलेषु रेखा ।वैरं क्रमादधममध्यमसज्जनेषु यद्वच्छिलासु सिकतासु जलेषु रेखा ॥ ६३ ॥

64

विश्वामित्राश्वपश्वादीन् (?) पारयत्यप्सु कर्दमे ।वार्धक्ये तमसि श्रान्ते यष्टिरिष्टेव सुप्रजाः ॥ ६४ ॥

65

पापिनां पापगणनां यः करोति नराधमः ।सत्यं चेदर्घमाप्नोति मिथ्या चेद् द्विगुणं भवेत् ॥ ६५ ॥

66

अन्नदाहे हरेन्मांसमम्बुदाहे च शोणितम् ।कामदाहे हरेन्नेत्रमनिद्रा रोगकारिणी ॥ ६६ ॥

67

तलोदरीणां तरुणीमणीनांतटाकजं तालपयोधराणाम् ।ताद्रूप्यमाप्तुं तरुणैः (तरणौ?) तदास्यं (स्यैः?)तपः परं तामरसं तनोति ॥ ६७ ॥

68

दिव्यं चूतफलं प्राप्य गर्वं नायाति कोकिल: ।पीत्वा कर्दमपानीयं भेको बकबकायते ॥ ६८ ॥

69

वित्तेन हीनं पुरुषं त्यजन्ति पुत्राश्च दाराश्च सहोदराश्च ।तं वित्तवन्तं पुनरेव यान्ति तस्मात्तु वित्तं पुरुषस्य बन्धुः ॥ ६९ ॥

70

वाङ्माधुर्य्यात्सर्वलोकप्रियत्वं वाक्पारुष्यात्सर्वलोकापकारी ।किं वा लोके कोकिलेनोपनीतं को वा लोके रासभेनापराधः ॥ ७० ॥

71

हंसो विभाति सरसीरुहबृन्दमध्येसिंहो विभाति हिमवगिरिगह्वरेषु ।जात्यो विभाति तुरगो रणरङ्गमध्येविद्वान् विभाति पुरुषेषु विचक्षणेषु ॥ ७१ ॥

72

किं केतकी फलति किं पनसस्य पुष्पंकिं नागवल्लयपि तु पुष्पफलैरुपेता ।कस्यापि कोऽप्यतिशयोऽस्ति न ( स?) येन सद्भिःसङ्ग्रा(गृ?)ह्यते जगति याति यतः प्रतीतिः (तिम्?) ॥ ७२ ॥

73

विद्वानेव विजानाति विद्वज्जनपरिश्रमम् ।न हि वन्ध्या विजानाति गुर्वी प्रसववेदनाम् ॥ ७३ ॥

74

अल्पीयसामेव हि जन्मभूमेःत्यागप्रमादो विदुषां न चास्ति ।अब्धेरुपेता मणयो भजन्तेराज्ञां शिरः काकमुखानि भेकाः ॥ ७४ ॥

75

अन्तस्सन्तोषचित्तानां संपदस्ति पदे पदे ।अन्तर्मलिनचित्तानां सुखं स्वप्नेऽपि दुर्लभम् ॥ ७५ ॥

76

नक्रस्स्वस्थानमासाद्य गजेन्द्रमपि कर्षति ।स एव प्रच्युतस्स्थानात् शुनापि परिभूयते ॥ ७६ ॥

77

पुत्रं च धर्मविमुखं भार्यां चाप्रियवादिनीम् ।अब्रह्मण्यं च राजन्यं त्यजेत्सद्योऽन्यथा पतेत् ॥ ७७ ॥

78

वैद्यं पापरतं नटं कुनृपतिं स्वाध्यायहीनं द्विजंयुद्धे कापुरुषं हयं गतरयं क्रुद्धं परिव्राजकम् ।राजानं च कुमन्त्रिभिः परिवृतं देशं च सोपप्लवंभार्या यौवनगर्वितां पररतां मुञ्चन्ति शीघ्रं बुधाः ॥ १८ ॥

79

कृपादीनं त्यजेदर्थं निर्वेदं ब्राह्मणं त्यजेत् ।त्यजेत्क्रुद्धमुखीं भार्यां ज्ञानहीनं गुरुं त्यजेत् ॥ ७९ ॥

80

मुक्ताफलैः किं वनमर्कटस्य मृष्टान्नदानेन तु गर्दभस्य ।अन्धस्य दीपाद्बधिरस्य गीतात् मूर्खस्य किं धर्मकथाप्रसङ्गैः ॥ ८० ॥

81

सर्वौषधीनामुदकं प्रधानं सर्वे (षण्णां?) रसानां लवणं प्रधानम् ।सर्वेन्द्रियाणां नयनं प्रधानं भवेन्नदीनामुदकं प्रधानम् ॥ ८१ ॥

82

आशाया दासा ये दासास्ते सर्वलोकस्य ।आशा दासी येषां तेषां दासायते लोकः ॥ ८२ ॥

83

महत्सन्दर्शने प्राप्ते समस्तनियमैरलम् ।तालवृन्तेन किं कार्य पार्श्वस्थे मलयानिले ॥ ८३ ॥

84

वक्रापि पङ्किलभवापि दुरासदापिव्यालाश्रितापि विफलापि सकण्टकापि ।गन्धेन बन्धुरसि केतकि सर्वजन्तोःएको गुणः खलु निहन्ति समस्तदोषान् ॥ ८४ ॥

85

सद्वृत्तश्शुचिरङ्कवल्कलधरस्स्नातोद्गतस्सागरात्प्रोञ्छन् ध्वान्तमधः करैर्द्विजपतिः देवानपि प्रीणयन् ।यत्कोकान् रमणीभिरेष रहयन्नु (त्यु?) त्कानेनेनैनसाप्राप्नोति स्वकलावि(यो)गमहता(मथवा?) दोषोबलीयान्गुणः( णात्) ॥ ८५ ॥

86

अखण्डितं च क्रमुकं चूर्णं तु रसवर्जितम् ।भूमौ निपतितं पत्रं शक्रस्यापि श्रियं हरेत् ॥ ८६ ॥

87

अनिधाय मुखे पत्रं प्रगे खादति यो नरः ।सप्तजन्मदरिद्रत्वमन्ते विष्णुस्थितिश्च न ॥ ८७ ॥

88

श्रीमतो भिक्षुकस्यापि हृद्यं वैवाहिकं गृहम् ।क्षीरार्णवे हरिश्शेते हरश्शेते महोदधौ (हिमालये?) ॥ ८८ ॥

89

यश्च निम्बं परशुना यश्चैनं मधुसर्पिषा ।यश्चैनं गन्धमाल्याद्यैस्सर्वस्य कटुरेव सः ॥ ८९ ॥

90

परैरालिङ्गिता यान्ति प्रस्खलन्ति पदे पदे ।अव्यक्तानि च भाषन्ते धनिनो मद्यपा इव ॥ ९० ॥

91

दुर्जनस्सज्जनात्पूर्वं पूज्यतां यातु तेन किम् ।गुदं प्रक्षालनात्पूर्वमाननादधिकं किमु ॥ ९१ ॥

92

लुब्धस्य वित्तं रणशूरशस्त्रं पतिव्रतायाः कुचकुम्भमध्यम् ।व्याघ्रस्य चर्म शबरी (चमरं?) मृगाणामेतानि (?) दत्तं (दग्धं?)मरणान्तकाले ॥ ९२ ॥

93

असभ्यः पिशुनश्चैव कृतघ्नो दीर्घवैरिणः (रक:?) ।चत्वारः कर्मचण्डालाः जातिचण्डालपञ्चमः (माः? ) ॥ ९३ ॥

94

दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं जलं पिबेत् ।सत्यपूतां वदेद्वाणीं श्रद्धापूतं धनं दिशेत् ॥ ९४ ॥

95

अधोमुखस्स्वयं रन्ध्री रन्ध्रान्वेषणतत्परः ।लालनाद्वृद्धिमाप्नोति शिश्नप्रायो हि दुर्जनः ॥ ९५ ॥

96

तित्तिरिश्च वराहश्च महिषः कुञ्जरस्तथा ।सेनापत्येन (-पतिश्च ?) राजानं (-जा च?) षडेतेस्वर्ग(स्वैर?)गामिनः ॥ ९६ ॥

97

सम्मुखात्सूर्यः सुप्रीतः भाषणेन सरस्वती ।खागतेनाग्निः सुप्रीतः आसनेन शतक्रतुः ॥ ९७ ॥

98

दशवत्ससमा धेनुः दशधेनुसमो वृषः ।दशोक्षकसमो दन्ती दशदन्तिशत(समः) क्रतुः ॥ ९८ ॥

99

दशक्रतुसमा कन्या दशकन्यासमा भुवः ।भूमेर्दानात्परं नास्ति विद्यादानं ततोऽधिकम् ॥ ९९ ॥

100

अल्पप्रभोस्तु सेवायां भुक्तिमात्रं प्रयोजनम् ।अनुग्रहम( ग्रहे त्व?)जामूल्यं निग्रहं ( हे? ) प्राणसङ्कटम् ॥ १०० ॥

101

जलूकं कृत्त (रक्त?) साध्यं च ज्वरसाध्यं च लङ्घनम् ।वमनं कफसाध्यं च पित्तसाध्यं विरेचनम् ॥ १०१॥

102

उत्साहसम्पन्नमदीनसत्त्वं क्रियाविधिज्ञं व्यवसायिनं च ।शूरं कृतज्ञं दृढसौहृदं च लक्ष्मीस्खयं वाञ्छति वासहतोः ॥ १०२ ॥

103

सर्ववाद्यमयी घण्टा सर्वद्रव्यमयं जलम् ।सर्वपुष्पमयी दूर्वा सर्वदेवमयो हरिः ॥ १०३ ॥

104

मातृहीनशिशुजीवनं वृथा शान्तिहीनतपसः फलं वृथा ।कान्तिहीननवयौवनं वृथा दन्तहीनरसभोजनं वृथा ॥ १०४ ॥

105

करानीतं पटानीतं स्त्रिया नीतं तथैव च ।एरण्डपत्रैरानीतं देवतानां च नार्हति ॥ १०५ ॥

106

आरोग्यं भास्करादिच्छेत् श्रियमिच्छेद्धुताशनात् ।ज्ञानं महेश्वरादिच्छेत् मोक्षमिच्छेज्जनार्दनात् ॥ १०६ ॥

107

न ह्यम्मयानि तीर्थानि न देवा मृच्छिलामयाः ।ते पुनन्त्युरुकालेन दर्शनादेव साधवः ॥ १०७ ॥

108

कुभोजनं चोष्णतया विराजते कुवस्त्रता शुभ्रतया विराजते ।दरिद्रता धीरतया विराजते कुरूपिता शीलतया विराजते ॥ १०८ ॥

109

हंसो न भाति बलिभोजनबृन्दमध्येगोमायुमण्डलगतो न विभाति सिंहः ।जात्यो न भाति तुरगः खरयूथमध्येविद्वान्न भाति पुरुषेषु निरक्षरेषु ॥ १०९ ॥

110

काव्यैरुपहता वेदाः पुत्रा जामातृभिर्हताः ।अश्वैरुपहता गावः पण्यस्त्रीभिः कुलाङ्गनाः ॥ ११० ॥

111

युक्तियुक्तमुपादेयं वचनं बालकादपि ।अन्यद्दुष्टमिव त्याज्यमप्युक्तं पद्मजन्मना ॥ १११ ॥

112

किंक्षणस्य कुतो विद्या किं(क)णस्य कुतो धनम् ।क्षणशः कणशश्चैव विद्यामर्थं च साधयेत् ॥ ११२ ॥

113

आयं पश्यन् व्ययं कुर्वन्(र्यात्?) आयादल्पतरं व्ययम् ।आयाभावे व्ययं कुर्वन् कुबेरोऽपि विनश्यति ॥ ११३ ॥

114

वरं दरिद्रोऽपि विचक्षणो जनो न चार्थवान् विश्रुतजातिवर्जितः ।सलोचनः क्षीणपथो (पटो?) वि (ऽपि?) शोभते न नेत्रहीनःशकटै(कटकै?)रलङ्कृतः ॥ ११४ ॥

115

सहोक्तिप्रत्युक्तिस्सरससहितैस्साक्षरजनैःप्रभोर्भावज्ञस्य प्रभवितुरुदारस्य भजनम् ।परीरम्भः कुम्भप्रतिभटकुचानां मृगदृशा-मसारे संसारे जगति खलु सारत्रयमिदम् ॥ ११५ ॥

116

इह भोगं यशस्त्रीति(ःप्रीतिं?) सभासु बहुमान्यताम् ।दद्यात्परत्र सुगतिं विद्याधनमनुत्तमम् ॥ ११६ ॥

117

अनक्षरज्ञेन जनेन सख्यं संभाषणं दुष्प्रभुसेवनं च ।आलिङ्गनं लम्बपयोधराणां प्रत्यक्षदुःखं त्रयमेव भूमौ ॥ ११७ ॥

118

न चोरहार्यं न च राजहार्यंविदेशयाने न च भारकार्यम् ।व्यये कृते नित्यमुपैति नित्यम् (वृद्धिं)विद्याधनं सर्वधनप्रधानम् ॥ ११८ ॥

119

अनन्तशास्त्रं बहु वेदितव्यम् अल्पश्च कालो बहवश्च विघ्नाः ।यत्सारभूतं तदुपासितव्यं हंसो यथा क्षीरमिवाम्बुमिश्रम् ॥ ११९ ॥

120

सिद्धमन्नं फलं पक्कं नारीप्रथमयौवनम् ।सुभाषितं च ताम्बूलं सद्यो गृह्णाति बुद्धिमान् ॥ १२० ॥

121

चोरद्रव्यविभागं च दूतद्रव्यं सुभाषितम् ।उत्क्रोशं (त्कोचं) प्रतिदानं च सद्यो गृह्णाति बुद्धिमान् ॥ १२१ ॥

122

सुभाषितपरिभ्रष्टं ताम्बूलरसवर्जितम् ।यन्मुखं वेदविभ्रष्टं तन्मुखं बिलमुच्यते ॥ १२२ ॥

123

परोपकृतिशीलानामपि(वि)दूरे हि सम्पदः ।मथ्नन् सुरार्थमम्भोधिं श्रियं लेभे परः पुमान् ॥ १२३ ॥

124

वेदविद्याव्रतस्नाते शिष्टे च गृहमागते ।नन्दन्त्योषधयस्सर्वा यास्यामः परमां गतिम् ॥ १२४ ॥

125

नष्टशौचे व्रतभ्रष्टे विप्रे वेदविवर्जिते ।रोदित्यन्नं हि दातव्यं किं मया दुष्कृतं कृतम् ॥ १२५ ॥

126

कदाचित्कवचं भेद्यं नाराचेन शरेण वा ।अपि वर्षशताघाते ब्राह्मणाशीर्न भिद्यते ॥ १२६ ॥

127

तैलाभ्यङ्गं द्विजोच्छिष्टं विप्राणामङ्गमर्दनम् ।गवां कण्डूयमानेन (नं चैव?) कोटियज्ञफलं लभेत् (लप्रदम्?) ॥ १२७ ॥

128

विषस्य तैलस्य न किञ्चिदन्तरंमृतस्य सुप्तस्य न किञ्चिदन्तरम् ।ऋणस्य दासस्य न किञ्चिदन्तरंद्विजस्य दैवस्य न किञ्चिदन्तरम् ॥ १२८ ॥

129

पङ्कजं च पलाशं च नद्यां च करवीरकम् ।चम्पकं पाटली चैव नीलोत्पलमिति स्मृतम् ॥ १२९ ॥

130

अहिंसा प्रथमं पुष्पं द्वितीये (पुष्पमि)न्द्रियनिग्रहम्(हः) ।तृतीयं तु दया पुष्पं तुरीयं दानपुष्पकम् ॥ १३० ॥

131

पञ्चमं शीलपुष्पं च षष्ठं कोपस्य निग्रहः ।सप्तमं सत्यपुष्पं च अष्टमं विष्णुदर्शनम् ॥ १३१ ॥

132

मात्रा विहीनस्तु रसैर्विनष्टः पित्रा विहीनस्तु कलाविनष्टः ।भ्रात्रा विहीनस्तु बलैर्विनष्टः दारैर्विहीनस्तु शरीरनष्टः ॥ १३२ ॥

133

सम्पत्सु महतां चित्तं भवत्युत्पलकोमलम् ।आपत्सु च महाशैलशिलासङ्घातकर्कशम् ॥ १३३ ॥

134

अद्यापि नोज्झति हरः किल कालकूटकूर्मो बिभर्ति धरणीं खलु पृष्ठभागे ।अम्भोनिधिर्वहति दुस्सहवाडवाग्नि-मङ्गीकृतं सुकृतिनः परिपालयन्ति ॥ १३४ ॥

135

बहवः फणिनो लोके भेकभक्षणतत्पराः ।एक एव हि शेषोऽयं धरणीधरणक्षमः ॥ १३५ ॥

136

चन्द्रः क्षयी प्रकृतिवक्रतनुः कलङ्कीदोषाकरः स्फुरति मित्रविपत्तिकाले ।हाहा तथापि शिरसा प्रियते हरेणनैवाश्रितेषु महतां गुणदोषचिन्ता ॥ १३६ ॥

137

उडुगणपरिवारो नायकोऽप्योषधीना-मयममृतशरीरः कान्तियुक्तोऽपि चन्द्रः ।भवति विगतरश्मिर्मण्डलं प्राप्य भानोःपरसदननिविष्टः को लघुत्वं न याति ॥ १३७ ॥

138

पापात् निवारयति योजयते हितायगुह्यं च गूहति गुणान्प्रकटीकरोति ।आपद्गतं च न जहाति ददाति कालेसन्मित्रलक्षणमिदं प्रवदन्ति सन्तः ॥ १३८ ॥

139

अब्धी रत्नमधो धत्ते धत्ते च शिरसा तृणम् ।अब्धेरेव हि दोषोऽयं रत्नं रत्नं तृणं (तृणम्) ॥ १३९ ॥

140

स्वयममृतनिधानो नायकोऽप्योषधीनांशतभिषगनुयातश्शम्भुमूर्द्धावतंसः ।परिहरति न चैनं राजयक्ष्मा शशाङ्कंहतविधिपरिपाकः केन वा लङ्घनीयः ॥ १४० ॥

141

दाता न दापयति दापयिता न दत्तेयो दानदापनपरो मधुरं न वक्ति ।तद्दानदापनमनोहरभाषणानित्रीण्यप्यमूनि खलु सत्पुरुषेषु भान्ति ॥ १४१ ॥

142

अनक्षरं यस्य जनस्य भाषणम् अनादरं यस्य प्र(वि?)भुत्वसेवनम् ।आलिङ्गनं लम्बपयोधराणां प्रत्यक्षदुःखं त्रयमेव भूमौ ॥ १४२ ॥[^]१

143

चिन्तायाश्च चितायाश्च बिन्दुमात्रं विशेषतः ।चिता दहति निर्जीवं चिन्ता जीवन्तमप्यहो ॥ १४३ ॥

144

बृहत्यां च युवत्यां च सर्वाङ्गं मधुरायते ।तयोरपि विशेषेण नालमूलोरुमूलयोः ॥ १४४ ॥

145

अर्थेन किं कृपणहस्तमुपागतेनशास्त्रेण किं चलधिया भृशमादृतेन ।रूपेण किं गुणसमूहविवर्जितेनस्नेहेन किं व्यसनकालपराङ्गुखेन ॥ १४५ ॥

146

प्राणमेव परित्यज्य मानमेवाभिरक्षतु ।अनित्यम(श्चा)ध्रुवं(वः) प्राणं(णो) मानमाचन्द्रतारकम् ॥ १४६ ॥

147

कामपि धते सूकररूपी कामपि रहितामिच्छति भूपः ।केनाकारि (च) मन्मथजननं केन विराजति तरुणीवदनम् ॥ १४७ ॥॥ कुङ्कुमेन ॥

148

आत्मबुद्ध्या सुखीभूया गुरुबुद्ध्या विशेषतः ।बहुबुद्ध्या विनाशस्स्यात्स्त्रीबुद्ध्या प्रलयो भवेत् ॥ १४८ ॥

149

त्रिभिर्वैर्षैस्त्रिभिर्मासैस्त्रिभिःपक्षैस्त्रिभिर्दिनैः ।अत्युत्कटैः पुण्यपापैरिहैव फलमश्नुते ॥ १४९ ॥

150

ब्राह्मणानामसंघातात् सर्पाणामतिनिद्रया ।गजानां बुद्धिदौर्बल्यात् जगज्जीवति निर्भयम् ॥ १५० ॥

151

स्वदत्तां परदत्तां वा यो हरेत्तु वसुन्धराम् ।षष्टिवर्षसहस्राणि विष्ठायां जायते कृमिः ॥ १५१ ॥

152

अधर्मादार्जितं द्रव्यमल्पकालं तु तिष्ठति ।ततस्सपत्नमयते समूलं तेन नश्यति ॥ १५२ ॥

153

अनारम्भो मनुष्याणां प्रथमं बुद्धिलक्षणम् ।आरम्भस्यान्तगमनं द्वितीयं बुद्धिलक्षणम् ॥ १५३ ॥

154

सर्वज्ञमज्ञं च वदन्ति लोके सन्तस्तदा (सदा?) तस्य चरित्रलोकात् ।न हि स्वयं वक्तुमलं समर्थः को वा चरेत्कुत्सितवृत्तिमार्यः ॥ १५४ ॥

155

केचिज्जनाः पण्डितमानिनो हि भवन्ति दुर्युक्तिकथाप्रसङ्गे ।क्षणार्द्धमप्यूहति सच्चरित्रं श्लाघ्यं विदुस्सत्पुरुषः (षं?) स्वबुद्ध्या ॥ १५५ ॥

156

कटीतटानि कुञ्जेषु सञ्चरन्वातकुञ्जरः ।हे(ए)रण्डतैलसिंहस्य गन्धमाघ्राय धावति ॥ १५६ ॥

157

हंससम्पदवतंसितं सरःस्वीकृतं सुभगमानिभिर्बकैः ।द्यौ(ः) मणि(?) घुमणिभूषित (ता?) क्षण-ज्योतिषेति हसितं नु कैतकैः ॥ १५७ ॥

158

अध्वा जरा मनुष्याणामनध्वा वाजिनां जरा ।अमैथुनं जरा स्त्रीणां वस्त्राणामातपो जरा ॥ १५८ ॥

159

पिता च ऋणवान् शत्रु: माता च व्यभिचारिणी ।भार्या रूपवती शत्रुः पुत्रश्शत्रुरपण्डितः ॥ १५९ ॥

160

द्रविणमापदि भूषणमुत्सवेशरणमाहवे(मात्मभये) निशि दीपिका ।बहुविधाभ्युपकारविधिक्षमो(भवति) कोऽपि भवानिव सन्मणिः ॥ १६० ॥

161

कच्चित्सहस्रान्मूर्खाणामेकमिच्छसि पण्डितम् ।पण्डितो ह्यर्थकृच्छ्रेषु कुर्यान्निःश्रेयसं महत् ॥ १६१ ॥

162

एकः खलोऽपि यदि नाम भवेत्सभायांव्यर्थीकरोति विदुषामखिलं प्रयासम् ।एकाऽपि पूर्णमुदरं मधुरैः पदार्थैःआलोड्य रेचयति हन्त न मक्षिका किम् ॥ १६२ ॥

163

महाराज श्रीमन् जगति यशसा ते धवलितेपयःपारावारं परमपुरुषोऽयं मृगयते ।कपर्दी कैलासं कुलिशभृदभौमं करिवरंकलानाथं राहुः कमलभवनो हंसमधुना ॥ १६३ ॥

164

अपूर्वेयं धनुर्विद्या भवतश्शिक्षिता कुतः ।मार्गणौघस्समायाति गुणो याति दिगन्तरम् ॥ १६४ ॥

165

नाविद्यमानं कर्णोऽपि ददातीति मया श्रुतम् ।अभयेन भयं दत्तमरातिभ्यः कथं त्वया ॥ १६५ ॥

166

राजन् कनकवर्षाणि त्वयि सर्वत्र वर्षति ।अभाग्यच्छत्रसञ्छन्ने मयि नायान्ति बिन्दवः ॥ १६६ ॥

167

ईशस्य कण्ठलग्नोऽपि वासुकिर्वायुभोजनः ।महतां स्थानमाश्रित्य फलं भाग्यानुसा(रतः?) ॥ १६७ ॥

168

सर्वदा सर्वदोऽसीति मिथ्या त्वं कथ्यसे बुधैः ।नारयो लेभिरे पृष्ठं न वक्षः परयोषितः ॥ १६८ ॥

169

त्वयि दातरि पृथ्वीश रणे वितरणेऽपि च ।पुनर्देहीति वचनं न प्रत्यर्थिनि नार्थिनि ॥ १६९ ॥

170

सर्वज्ञ इति लोकोऽयं भवन्तं भाषते मृषा ।पदमेकं न जानीषे वक्तुं नास्तीति याचके ॥ १७० ॥

171

राजन् दौवारिकादेव प्राप्तवानस्मि वारणम् ।मदवारणमिच्छामि त्वत्तोऽहं पृथिवीपते ॥ १७१ ॥

172

साहित्यार्णवकर्णधारकरुणापीयूषवारांनिधेविद्वज्ज्चातकवारिवाह कमलापर्यङ्कपङ्केरुह ।त्वां केनोपमिमीमहे त्रिजगति प्राप्तप्रकर्षैः गुणैःतुल्यं ते नरसिंह पार्थिव वयं कुत्रापि न प्राप्नुमः ॥ १७२ ॥

173

चन्द्रस्येव तवोदयेन महती श्रीश्चन्द्रिका वर्धतां(द्वे)ष्टारश्शलभीभवन्तु भवतः तीव्रप्रतापानले ।त्वद्दोर्दण्डमहाभुजङ्गशिरसि स्थेयादनन्ता चिरंदिङ्नारीकुचमण्डले तव यशःपूरो वि (ऽपि ) हारायताम् ॥ १७३॥

174

स्याद्राजा यदि सुन्दरो नहि यदि स्यात्सुन्दरो निर्गुणःस्याच्चेत्पूर्णगुणो बलेन रहितः स्याच्चेद्बली कातरः ।वीरश्चेद्विनयोज्झितः (सविनयः) स्याच्चैन्न दानोत्सुकःस्याद्राजा (द्दाता?) यदि नातिलोक(भ?)विमुखं(खः?)त्वं चेद्गुणानां निधिः(?) ॥ १७४ ॥

175

छायाभिः प्रथमं ततश्च कुसुमैः पश्चात्फलैस्स्वादुभिःप्रीणात्येष तरुर्महानयमिति श्रान्तैस्समाश्रीयते ।को जानाति तदीयकोटरपुटे प्रत्यग्रहालाहल-ज्वालाजालजटालपाटलफणः क्रूरः फणी वर्तते ॥ १७५ ॥

176

निर्जितारिधरणीधरौ भुजौवर्जितान्यहरिणीदृशौ दृशौ ।यस्य दानमहिमाकरौ करौसंस्कृतार्थवचनोन्मुखं मुखम् ॥ १७६ ॥

177

गुणिनि गुणज्ञो रमते नागुण(शील)स्य गुणिनि परितोषः ।अलिरेति वनात्कमलं न दर्दुरस्त्वेकवासोऽपि ॥ १७७ ॥

178

असन्तुष्टो द्विजो नष्टः सन्तुष्टः क्षत्रियस्तथा ।सलज्जा गणिका नष्टा पण्यस्त्रीभिः (निर्लज्जा च?) कुलाङ्गना ॥ १७८ ॥

179

जिह्वा दग्धा परान्नेन हस्तो दग्धः परिग्रहात् ।मनो दग्धं परस्त्रीभिः ब्रह्मशापः कुतः कलौ ॥ १७९ ॥

180

अप्सु प्लवन्ते पाषाणा: मानुषा घ्नन्ति राक्षसान् ।कपयः कर्म कुर्वन्ति कालस्य कुटिला गतिः ॥ १८० ॥

181

मृद्बिना मासशौचं स्यात्पक्षे होमः( मं?) तु वर्जयेत् ।उष्णोदकं सप्तरात्रं द्विजश्शूद्रत्वमाप्नुयात् ॥ १८१ ॥

182

नैकः पन्थानमागच्छेत् न वसेद्ग्राममन्दिरे ।जनवास(-क्यं) च (न?) कर्तव्यं न स्त्रीवाक्यं कदाचन ॥ १८२ ॥

183

अन्नं मुक्तासुवर्णं द्रवगुणरहितास्वर्णपू(रू)पाश्च सूपाःसामोदाश्शाकभेदाः फलगुडमिलिताः पायसम्.... ।यावद्भोज्यं तदाज्यं दधि कठिनतरं नैकरूपास्त्वपूपाःभुज्यन्ते भूसुरौघैर्महति तव गृहे रामचन्द्रस्य तृप्त्यै ॥ १८३ ॥

184

अन्नं किंशुकपुष्पपुञ्जसदृशं पाषाणजालैर्युतंधूम्यं गन्धयुतं च जालमखिलं भग्नाश्च दन्तालयः ।आज्यं दूरतरं न चापि लवणं न श्रूयते तिन्त्रिणीभक्ष्याणां वचनं च नास्ति हि सखे तद्भोजनं वर्णये ॥ १८४ ॥

185

शाकैरनेकैर्नलभीमपाकैः सूपैरपूपैरमृतायमानैः ।आज्यप्रवाहैश्च दधिप्रवाहैः ते भुञ्जते मानवपुण्यवन्तः ॥ १८५ ॥

186

रवौ पुष्पं गुरौ दूर्वां भृगौ गोमयमेव च ।भौमे भूमिं विनिक्षिप्य तैलाभ्यङ्गं समाचरेत् ॥ १८६ ॥

187

को देशः कुत्र पुर्यां तव वसतिररे किं च गोत्रं च शाखाका ते किं नाम सत्यं वद किमु पठितं वेदशास्त्रं च किन्नु ।इत्थं पृष्टा धनाढ्यो वितरति च पुरः काचिकां (काकिणीं?) ब्राह्मणेभ्योहृष्टेभ्यस्सर्ववित्तं (वितरति हि भवान्?) दृष्टमात्रेण चित्रम् ॥ १८७ ॥

188

ज्ञानवृद्धास्तपोवृद्धाश्शीलवृद्धास्तथैव च ।सर्वे ते धनवृद्धस्य द्वारे तिष्ठन्ति किंकराः ॥ १८८ ॥

189

श्रुत्वा वेदमनेकशास्त्रपठनात्(नं?) किं तेन ज्ञानं विना (ज्ञानं विना तेन किं?)स्नानं तर्पणहोममप्यनुदिनं किं तेन दानं विना । गीता(त्वा?) राख(ग)मनेकशास्त्र(ताल?)गणनं किं तेन कण्ठं विनाताम्बूलादि विभूषणैः (णं?) परिमलैः (लः?) किं तेन काव्यं [कान्तां?] विना ॥ १८९ ॥

190

माषो नं (न?) माषद्रव्यः (व्यं?) स्यात्सन्ध्यायामेव याचकः (सन्ध्याचमनवाचकः?) ।करान्तरस्थिता रेखामाषास्ताः परिकीर्तिताः ॥ १९० ॥

191

गोकर्णाकृतिहस्तेन माषमग्नजलं पिबेत् ।तन्न्यूनमधिकं पीत्वा सुरापानसमं पिबेत् (भवेत्?) ॥ १९१ ॥

192

शब्देनापः पयः पीत्वा शब्देन घृतपायसम् ।आपोशनं सोमपानं सुरापानसमं भवेत् ॥ १९२ ॥

193

अतिथिः द्वारि तिष्ठेत आपो गृह्णाति यो नर ।आपोशनं सुरापानमन्नं गोमांसभक्षणम् ॥ १९३ ॥

194

स्नाने दाने जपे होमे स्वाध्याये पितृतर्पणे ।एकवस्त्रो द्विजः कुर्यात् तत्सर्वं निष्फलं भवेत् ॥ १९.४ ॥

195

स्नानवस्त्रेण यो विप्रः शरीरं परिमार्जयेत् ।वृथा भवति तत्स्नानं पुनः स्नानेन शुध्यति ॥ १९५ ॥

196

स्वानं कृत्वार्द्रशिरसि (सा?) विण्मूत्रं सृजते यदि ।वृथा भवति तत्स्नानं पुनः स्नानेन शुध्यति ॥ १९६ ॥

197

रात्रौ भोजनकाले तु यदि दीपो विनश्यति ।पाणिभ्यां पात्रमादाय गायत्रीं मनसा स्मरेत् ॥ १९७ ॥

198

एकपङ्क्त्युपविष्टानां विप्राणां सहभोजने ।यद्येकोऽपि त्यजेदन्नं सर्वैरुच्छिष्टभोजनम् ॥ १९८ ॥

199

अग्निना भस्मना चैव स्तम्भेन च जलेन च ।अद्वारेणैव मार्गेण पङ्क्तिदोषो न विद्यते ॥ १९९ ॥

200

आपोशनमकृत्वा तु यश्चान्नं परिमर्दयेत् ।मर्दितं चापि तच्चान्नममेध्यं मनुरब्रवीत् ॥ २०० ॥

201

आसने पादमारोप्य यो भुङ्क्ते स द्विजाधमः ।मुखेन धमते चान्नं तुल्यं गोमांसभक्षणम् ॥ २०१ ॥

202

सर्वतीर्थमयी भूमिस्सर्वरत्नसमन्विता ।सर्वौषधिगुणोपेता किमर्थमुपलेपना(नम्?) ॥ २०२ ॥

203

इन्द्रस्य वज्रेण हतो वृत्रासुरमहायशाः ।मेदसा सर्वविच्छिन्नं तदर्थमुपलेपनम् ॥ २०३ ॥

204

चतुरश्रं ब्राह्मणस्य त्रिकोणं क्षत्रियस्य तु ।वैश्यस्य वर्तुलाकारं शूद्रस्याभ्युक्षणं तथा ॥ २०४ ॥

205

ब्रह्मा विष्णुश्च रुद्रश्च श्रीर्हुताशन एव हि ।मण्डलान्युपजीवन्ति तस्मात्कुर्वीत मण्डलम् ॥ २०५ ॥

206

यातुधानपिशाचाश्च क्रूराश्चैव तु राक्षसाः ।हरन्ति रसमन्नस्य मण्डलेन विवर्जितम् ॥ २०६ ॥

207

सदण्डं कदलीपत्रं वामभागाग्रं विन्यसेत् ।दक्षिणेऽग्रं समादाय भुक्त्वा चान्द्रायणं चरेत् ॥ २०७ ॥

208

आपोशनं चासनं च तैलाभ्यङ्गं तथैव च ।स्वयं करकृतं चैव आयुः श्रीपुत्रनाशनम् ॥ २०८ ॥

209

दीपप्रशमनं पुंसां स्त्रीणां कूष्माण्डखण्डनम् ।अचिरेणैव कालेन वंशच्छेदो भविष्यति ॥ २०९ ॥

210

अस्नाताशी मलं भुङ्क्ते अजपी पूयभक्षणम् ।अहुताशी विषं भुङ्क्ते अदाता विषमश्नुते ॥ २१०॥

211

ज्ञाननिमित्तं गुरूपदेशः कलहनिमित्तं निष्ठुरवाणी ।मरणनिमित्तं गुणविपरीतम् उदरनिमित्तं बहुकृतवेषम् ॥ २११ ॥

212

एकाहं जपहीनस्तु सन्ध्याहीनो दिनत्रयम् ।द्वादशाहमनभिस्तु शूद्र एव न संशयः ॥ २१२ ॥

213

विद्वत्सङ्गे विवाहे च यज्ञे श्रीपतिदर्शने ।सन्ध्यावन्दनविच्छित्तिः न दोषाय कदाचन ॥ २१३ ॥

214

पादौ प्रक्षाल्य यच्छेषं तदाचामेन्नराधमः ।श्वानमूत्र समं तोयम् (इत्ये)वं मनुरब्रवीत् ॥ २१४ ॥

215

ओङ्कारः पुरुषः पूर्वः व्याहृतिः प्रकृति(ः) स्त्रियः ।उभयोः करसंयोगे वस्त्रेणाच्छादयेन्नरः ॥ २१५ ॥

216

संहताङ्गुलिना तोयं गृहीत्वा पाणिना द्विजः ।मुक्ताङ्गुष्ठकनिष्ठे तु शिष्टमाचमनं पिबेत् ॥ २१६ ॥

217

जनिता चोपनेता च यश्च विद्यां प्रयच्छति ।अन्नदाता भयत्राता पञ्चैते पितरस्स्मृताः ॥ २१७ ॥

218

गुरुपत्नी राजपत्नी ज्येष्ठपत्नी तथैव च ।पत्नी माता स्वयं (स्व-)माता (च) पञ्चैता मातरस्स्मृताः ॥ २१८ ॥

219

पुस्तकेषु च या विद्या परहस्तेषु यद्धनम् ।युद्धकाले गृहे शस्त्रं त्रीणि कार्यं वृथा (विना?) वृथा ॥ २१९ ॥

220

मरणान्तानि वैराणि प्रसवान्तं च यौवनम् ।कुपितं प्रणयान्तं च याचितान्तं च गौरवम् ॥ २२० ॥

221

अश्वारूढं पयःपानं गजारूढं तु मैथुनम् ।आन्दोलिकायां मर्दनं च पादचारी(रि?) तु भोजनम् ॥ २२१ ॥

222

अतिदानाद्धतः कर्णः अतिलोभात्सुयोधनः ।अतिकामाद्दशग्रीवः अति सर्वत्र वर्जयेत् ॥ २२२ ॥

223

इङ्गितज्ञा मागधास्स्युः प्रेक्षितज्ञाश्च कोसलाः ।अर्धोक्ताः कुरुपाञ्चाला स्पष्टोक्त्या दक्षिणापथाः ॥ २२३ ॥

224

पद्यमङ्गुलिविच्छेदमुरोविन्यस्तमक्षरम् ।तन्नामकरणं चैव दास्यमेतच्चतुर्विधम् ॥ २२४ ॥

225

अभिवादनशीलस्य नित्यं वृद्धोपजी(से)विनः ।चत्वारि तस्य वर्द्धन्ते आयुः प्रज्ञा यशो बलम् ॥ २२५ ॥

226

ततोऽभिवादयेद्विप्रान् श्रोत्रियांश्च गुरूनपि ।सायं प्रातश्च होतव्यं कर्तव्यञ्चात्मनो हितम् ॥ २२६ ॥

227

पाषण्डं पतितं व्रात्यं महापातकिनं शठम् ।....स्थं कृतघ्नं च नाभिवाद्येत्कदाचन ॥ २२७ ॥

228

कृताभिवादि(द)नं (पूर्वं) यः पुनर्नाभिवादयेत् ।स्मशाने जायते वृक्षः कङ्कगृध्रोपसेवितः ॥ २२८ ॥

229

प्रतिपत्पर्व षष्ठी च नवमी द्वादशी तथा ।दन्तानां काष्ठसंयोगं प्रयत्नेन विवर्जितः (र्जयेत्) ॥ २२९ ॥

230

खदिरश्च कदम्बश्च सोमबिल्वस्तथैव च ।उदुम्बररुहश्चैव ये चान्ये पुण्यभूरुहः ॥ २३० ॥

231

एते प्रशस्ततरवः दन्तधावनकर्मणि ।कण्टकीक्षीरवृक्षोत्थद्वादशाङ्गुलमव्रणम् ॥ २३१ ॥

232

कनिष्ठाङ्गुलिवत् स्थूलं पूर्वार्धकृतकुञ्चितम् ।अभावे दन्तकाष्ठस्य प्रतिषिद्धदिनेऽपि च ।अपां द्वादशगण्डूषैः मुखशुद्धिर्भविष्यति ॥ २३२ ॥

233

मूत्रे सम्यक् पुरीषे तु दिवा कुर्यादुदङ्मुखः ।दक्षिणाभिमुखो रात्रौ सन्ध्ययोरुभयोस्तथा ॥ २३३ ॥

234

दिवा सन्ध्यासु कर्णस्थब्रह्मसूत्र उदङ्मुखः ।कुर्यान्मूत्रपुरीषे च रात्रौ चेद्दक्षिणामुखः ॥ २३४ ॥

235

गृहीतशिश्नश्चोत्थाय मृद्भिरभ्युद्धतैर्जलैः ।गन्धलेपक्षयकरं शौचं कुर्यादतन्द्रितः ॥ २३५ ॥

236

अपि सहवसतामसतां जलरुह(जल)वद्भवत्यसंश्लेषः ।दूरेऽपि सतां वसतां (प्रीतिःकुमु)देन्दुवद्भाति ॥ २३६ ॥

237

गर्जति शरदि न वर्षति वर्षति वर्षासु निस्स्वनो मेघः ।नीचो वदति न कुरुते न वदति सुजनः करोत्येव ॥ २३७ ॥

238

अपेक्षन्ते न च स्नेहं न पात्रं न दशान्तरम् ।सदा लोकहितासक्त्या रत्नदीपा इवोत्तमाः ॥ २३८ ॥

239

(यन्मनीषिपदाम्भोजरजः) कणपवित्रितम् ।तदेव भवनं नो चेद्भकारस्तत्र लुप्यते ॥ २३९ ॥

240

श्लोकस्तु श्लोकतामेति यत्र तिष्ठ(न्ति) (साधवः) ।तैर्विहीने सभामध्ये लकारस्तत्र लुप्यते ॥ २४० ॥

241

उन्मत्तकण्टकिफलप्रतियोगिबुद्ध्यावैरं वृथैव कुरुषे पनसेन साकम् ।सन्तो हसन्ति न भजन्ति भजन्ति चेत्त्वांभ्रान्ता भवन्ति सहसेति जगत्प्रसिद्धिः ॥ २४१ ॥

242

सुजनव्यजनं मन्ये महावंशसमुद्भवम् ।स्वपरिभ्रमणेनैव तापं हरति देहिनाम् ॥ २४२ ॥

243

गुणलक्षं परित्यज्य दोषं गृह्णाति दुर्जनः ।घेनोः पयोधरस्थोऽपि गोपिडो लोहिताशनः ॥ २४३ ॥

244

असज्जनेन संसर्गादसत्तां यान्ति साधवः ।मधुरं शीतलं तोयं पावकं प्राप्य तप्यते ॥ २४४ ॥

245

दुर्जनभृशसंसर्गात् साधुजनस्तस्य दोषमायाति ।दशमुखकृतापराधात् अब्धिर्बद्धः शिलाभरैः कीशैः ॥ २४५ ॥

246

न स्थातव्यं न गन्तव्यं (क्षणमप्यधमैस्सह) ।पयोऽपि शौण्डिनीहस्ते वारुणीत्यभिधीयते ॥ २४६ ॥

247

कस्तूरिकां तृणभुजामटवीमृगाणांनिक्षिप्य ना(भिषु चकार) च तान्वधार्हान् ।मूढो विधिस्सकलदुर्जनसङ्घजिह्वा-मूलेषु निक्षिपति चेत्सकलोपकारः ॥ २४७ ॥

248

खलानामलकानां च धृतानां मूर्ध्नि भीरुभिः ।उपर्युपरि संस्कारात् भूयो भवति वक्रता ॥ २४८ ॥

249

खलजिह्वा च नौका च प्रतिकूलप्रवर्तिनी ।प्रतार(णा)य लोकस्य दारुणा केन निर्मिता ॥ २४९ ॥

250

विषधरतोऽप्यतिविषमःखल इति न मृषा वदन्ति सन्तोऽपि ।यदयं नकुलद्वेषीसकुलद्वेषी पुनः पिशुनः ॥ २५० ॥

251

खलानां कण्टकानां च द्विविधैव प्रतिक्रिया ।उपानन्मुखभङ्गो वा दूरतो वा विसर्जनम् ॥ २५१ ॥

252

कस्त्वं भद्र खलेश्वरोऽहमिह किं घोरे वने स्थीयतेव्यालव्याघ्रमृगादिभिः(दन?) प्रह(भृ?)तिभिः खाद्योऽहमित्याशया ।दिष्टया शालि(न्ति?)रहो किमध्यवसिता मद्देहमांसाशन-प्रत्युत्पन्ननृमांसभक्षणरसाः खादख(न्तु) सर्वानिति ॥ २५२ ॥

253

त्वद्विरहमसहमाना निन्दति बाला दिवानिशं शम्भुम् ।राहुमपि रामभद्रं रामानुजमपि च पन्नगारातिम् ॥ २५३ ॥

254

तन्वङ्ग्या नवसङ्गमे निपुणतां दृष्ट्वान्यथाशङ्किनःभर्तुश्चित्तमवेक्ष्य साऽपि चतुरा भित्तौ किमप्यालिखत् ।एकं मत्तमतङ्गजं तदुपरि क्रोधात्पतन्तं शिशुंसिंहीगर्भविनिस्सृतं पुनरसौ दृष्टा स हृष्टोऽभवत् ॥ २५४ ॥

255

कचभारात्कुचभारः कुचभाराद्भीतिमेति कचभारः ।कचकुचभाराज्जघनं कोऽयं चन्द्रानने चमत्कारः ॥ २५५ ॥

256

बदनात्पदयुगलीयं वचनादधरश्च दन्तपङ्क्तिश्च ।कु(क)चत: कुचयुगलीयं लोचनयुगलं च मध्यतस्त्रसति ॥ २५६ ॥

257

कुसुमे कुसुमोत्पत्तिः श्रूयते न च दृश्यते ।बाले तव मुखाम्भोजे दृष्टमिन्दीवरद्वयम् ॥ २५७ ॥

258

बाले तवाघरसुधारसपानकालेचेतो मदीयमभिवाञ्छति शेषभावम् ।आलिङ्गने तव विरोचनपौत्रभावम्आखण्डलत्वमखिलाङ्गनिरीक्षणेषु ॥ २५८ ॥

259

ग्रहणसमयवेला (प्रविश झटिति गेहं) मा बहिस्तिष्ठ बालेग्रहणसमयवेला वर्तते शीतरश्मेः ।तव मुखमकलङ्कं वीक्ष्य राहुश्च नूनंग्रसति तव मुखेन्दुं चन्द्रबिम्बं विहाय ॥ २५९ ॥

260

जाता लता हि शैले जातु लतायां न जायते शैलः ।सम्प्रति तद्विपरीतं कनकलतायां गिरिद्वयं जातम् ॥ २६० ॥

261

इन्दिन्दिरो मरन्दे विमुखो यदि किन्नु मधुनि माहात्म्यम् ।रसिको वाञ्छति नो चेत् .... धरबिम्बमस्य को भूमा (?) ॥ २६१ ॥

262

अप्यखिलालङ्कारानाकलयन्तोऽपि रसविदश्चित्रम् ।कलयन्ति सरसकाव्ये नालङ्कारं[^]१ कदाचिदपि ॥ २६२ ॥

263

काचिद्बाला रमणवसतिं प्रेषयन्ती करण्डंसा तन्मूले समयमलिखव्यालमस्योपरिष्टात् ।गौरीकान्तं पवनतनयं चम्पकं चास्य भावंपृच्छत्यग्रे सदसि विदुषां मल्लिनाथः कवीन्द्रः ॥ २६३ ॥

264

शुनां च पिशुनानां च परवेश्मप्रवेशिनाम् ।प्रयोजनं न जानीमः पात्राणां दूषणाहते ॥ २६४ ॥

265

जीवनग्रहणे नम्राः गृहीत्वा पुनरुत्थिताः ।किं कनिष्ठाः किमु ज्येष्ठाः घटीयन्त्रस्य दुर्जनाः ॥ २६५ ॥

266

यथा ग्रामविशुद्ध्यर्थं सूकरः परिकल्पितः ।साधुपापविशुद्ध्यर्थं दुर्जनः परिकल्पितः ॥ २६६ ॥

267

का विद्या कवितां विनाऽर्थिनि जने त्यागं विना श्रीश्च काकस्सूनुर्विनयं विना कुलवधूः का कान्तभक्तिं विना ।को धर्मः कृपया विना नरपतिः को नाम नीतिं विनाको भोगो रमणीं विना क्षितितले किं नर्म कीर्तिं विना ॥ २६७ ॥

268

कवित्वे वादित्वं कनककुसुमे सौभग(रभ)गुणःधनित्वे दातृत्वं लिकुचफलमात्रे मधुरता ।कुलीने सौजन्यं मृगमदरसे रागरचनाप्रभुत्वे विद्वत्त्वं परभृतमुखे मानुषवचः ॥ २६८ ॥

269

प्रभुर्विवेकी प्रमदा सुशीलातुरङ्गमश्शस्त्रनिपातधीरः ।विद्वान् विरागी धनिकः प्रदातापञ्चैव रत्नानि भवन्ति लोके ॥ २६९ ॥

270

मानुष्ये सति दुर्लभा पुरुषता पुंस्त्वे पुनर्विप्रताविप्रत्वे बहुविद्यता न सुलभा विद्यावतोऽर्थज्ञता ।अर्थज्ञस्य विचित्रवाक्यपटुता तत्रापि लोकज्ञतालोकज्ञस्य समस्तशास्त्रविदुषो धर्मे मतिर्दुर्लभा ॥ २७० ॥

271

अश्वश्शस्त्रं शास्त्रं वीणा वाणी नरश्च नारी च ।पुरुषविशेषप्राप्ता भवन्त्ययोग्याश्च योग्याश्च ॥ २७१ ॥

272

श्वा यद्दशति मनुष्यान् न च तं मनुजाः प्रतिदशन्ति ।यद्याक्रोशति नीचः न च तं वदतीह सज्जनः किंचित् ॥ २७२ ॥

273

न शोभते गुणः पुंसां स्वयं स्वगुणवर्णने ।यथा सुखं कामिनीनां न स्वयं कुचमर्दने ॥ २७३ ॥

274

कोदण्डमिक्षुः कुसुमानि बाणःमौर्वी च मत्ता मधुपालिरेव ।तथापि कामोऽप्यरुधत्पुरारिंविनाशकाले विपरीतबुद्धिः ॥ २७४ ॥

275

मातुलो यस्य गोविन्दः पिता यस्य धनञ्जयः ।अभिमन्युर्वधं प्राप्तः कालस्य कुटिला गतिः ॥ २७५ ॥

276

कालस्समविषमकरः कालस्सम्मानपरिभवकरः[^१] ।कालः करोति पुरुषं दातारं याचितारं च ॥ २७६ ॥

277

यथा वृथा दानविहीनसम्पत् यथा वृथा साक्षिविहीनसंसत् ।यथा वृथा (ज्ञा?)नविहीनधर्मः तथा वृथा वेदविहीनविप्रः ॥ २७७ ॥

278

नास्ति विप्रसमं वीर्यं नास्ति व्याधिसमो रिपुः ।न चापत्यसमः स्निग्धो नास्ति दैवात्परं बलम् ॥ २७८ ॥

279

आगतव्ययशीलस्य कृशत्वमतिशोभते ।द्वितीयश्चन्द्रमा वन्द्यो न वन्द्यः पूर्णचन्द्रमाः ॥ २७९ ॥

280

अस्तीत्येव कृषिं कुर्यात् अस्ति नास्तीति वाणिजम् ।नास्तीत्येव ऋणं दद्यात् नाहमस्मीति साहसम् ॥ २८० ॥

281

विद्या विवादाय धनं मदाय प्रज्ञाविशेषः परवञ्चनाय ।मूर्खस्य साधोर्विपरीतमेतत् ज्ञानाय दानाय च रक्षणाय ॥ २८१ ॥

282

त्यागिनां किं विचारेण दोषेष्वपि गुणेष्वपि ।समं वर्षति पर्जन्यः सस्येष्वपि तृणेष्वपि ॥ २८२ ॥

283

वने कलापी गगने च मेघः सरस्सु पद्मं दिवि तिग्मभानुः ।चन्द्रोऽन्तरिक्षे कुमुदं सरस्यां दूरेऽपि मैत्री खलु सज्जनानाम् ॥ २८३ ॥

284

गावो भूयः पशून् पाति(न्ति) रणे भीता नृपानपि ।तृणमेव परं मन्ये नरादनुपकारिणः ॥ २८४ ॥

285

दिशवनहरिणीभ्यो वंशकारण्डवीभ्यःकबलमुपल(म्) कोटिच्छिन्नमूलं कुशानाम् ।शु(श)कयुवतिकपोलापाण्डुताम्बूलवल्ली-
दलद(म)रुणनखात्रैः पाटिता(तं) वा वधूभ्यः ॥ २८५ ॥

286

कर्णौ जनन्यः प्रविशालयेयुःविशालयेदक्षियुगं च काचित् ।प्रकाममभ्यस्य तु नाम विद्यांसौजन्यमभ्यासवशाद(शेन)लभ्यम् ॥ २८६ ॥

287

तृणाल्लघुतरस्तूलस्तूलादपि च याचकः ।वायुना किं न नीतोऽसौ मामयं याचयेदिति ॥ २८७ ॥

288

याचना हि पुरुषस्य महत्त्वं नाशयत्यखिलमेव तथा हि ।सद्य एव भगवानपि विष्णुः वामनो भवति याचितुमिच्छन् ॥ २८८ ॥

289

कण्ठादूर्ध्वं विनिर्यान्ति प्राणा याच्ञाक्षरैस्सह ।ददामीत्यक्षरैर्दातुः पुनः श्रोत्राद्विशन्ति ते ॥ २८९ ॥

290

मीयतां कथमपीप्सितमेषां दीयतां द्रुतमयाचितमेव ।तत् (तं) धिगस्तु कलयन्नपि वाञ्छाम् अर्थिवागवसरं सहते यः ॥ २०० ॥

291

याचमानज(न)मानसवृत्तेः पूरणाय बत जन्म न यस्य ।तेन भूमिरतिभारवतीयं न द्रुमैर्न गिरिभिर्न समुद्रैः ॥ २९१ ॥

292

जलधिजलान्ता नद्यः स्त्रीभेदान्तानि बन्धुहृदयानि ।पिशुनजनान्तं गुह्यं दुष्पुत्रान्तानि सज्जनकुलानि ॥ २९२ ॥

293

अप्रार्थितानि दुःखानि यथैवाऽऽयान्ति देहिनाम् ।सुखान्यपि तथाऽऽयान्ति दैन्यमत्रातिरिच्यते ॥ २९३ ॥

294

नीचं नमन्ति नियमेन मृषा वदन्तिभारं वहन्ति धनिनां वशगा भवन्ति ।पूरं तरन्ति
जलधेर्वियदुत्पतन्तिप्रादेशकुक्षिपरिपूरणपारवश्यात् ॥ २९४ ॥

295

कृ(तृ)ष्णे कृष्णेऽपि ते शक्तिः दु(दृ)ष्टा मर्त्येषु का कथा ।त्रैलोक्यं(य) व्यापि यद्रूपं (तद्रूपं वामनीकृतम्) ॥ २९५ ॥

296

निष्की निष्कशतं शती दशशतं लक्षं सहस्राधिपःलक्षेशः क्षितिपालतां क्षितिपतिश्श(श्च)केश्वरत्वं गतः ।श(च)क्रेशः पुनरिन्द्रतां
शतमखश्शैवं पदं वाञ्छतियक्षा(त्र्यक्षो) ब्रह्मपदं स वैष्णवपदं तृष्णावधिं को गतः ॥ २९६॥

297

दन्ताः स(विश्लथ)दन्ताः केशाः (काश)प्रसूनसङ्काशाः ।नयनं तमसामयनं तथाऽपि चित्तं धनाङ्गनायत्तम् ॥ २९७ ॥

298

आशा नाम मनुष्याणां काचिदाश्चर्यशृङ्खला ।यया बद्धाः प्रधावन्ति मुक्तास्तिष्ठन्ति कुत्रचित् (बद्धवत्) ॥ २९८ ॥

299

आशापिशाचिकाविष्टः पुरतो यस्य कस्यचित् ।वन्दते निन्दति स्तौति रोदिति प्रहसत्यपि ॥ २९९ ॥

300

आशातुरगमारुह्य नित्यं धावति याचकः ।न चार्तिः न श्रमो ह्यस्य न गतौ ना(वा)पि मन्दता ॥ ३०० ॥

301

प्रातः क्षालितलोचनः करतलोदञ्च पवित्राङ्कुरःतत्तत्स्थानकृतत्रि.............[^*]॥ ३०१ ॥